# सुन्दरकाण्ड एकचत्वारिंशः सर्गः (४१) - अशोकभञ्जनम्

स च वाग्भिः प्रशस्ताभिर् गमिष्यन् पूजितस् तया ।
तस्माद् देशादपक्रम्य चिन्तयामास वानरः ॥ १ ॥

अल्प शेष मिदं कार्यं दृष्टेय मसितेक्षणा ।
त्रीनुपाया नतिक्रम्य चतुर्थ इह दृश्यते ॥ २ ॥

न साम रक्षःसु गुणाय कल्पते
न दानमर्थोप चितेषु युज्यते ।
न भेद साध्या बलदर्पिता जनाः
पराक्रमस् त्वेव ममेह रोचते ॥ ३ ॥

न चास्य कार्यस्य पराक्र माद्दते
विनिश्चयः कश्चि दिहोप पद्यते ।
हत प्रवीरा हि रणे हि राक्षसाः
कथंचिदीयुर् यदिहाद्य मार्दवम् ॥ ४ ॥

कार्ये कर्मणि निर्दिष्टे यो बहून्यपि साधयेत् ।
पूर्व कार्या विरोधेन स कार्यं कर्तु मर्हति ॥ ५ ॥

न ह्येकः साधको हेतुः स्वल्पस् यापीह कर्मणः ।
यो ह्यर्थं बहुधा वेद स समर्थोऽर्थसाधने ॥ ६ ॥

इहैव तावत् कृत निश्चयो ह्यहं
यदि व्रजेयं प्लवगेश्व रालयम् ।
परात्म संमर्द विशेष तत्त्ववित्
ततः कृतं स्यान्मम भर्तृ शासनम् ॥ ७ ॥

कथं नु खल्वद्य भवेत् सुखागतं
प्रसह्य युद्धं मम राक्षसैः सह ।
तथैव खल्वात्म बलं च सारवत्
स मानयेन्मां च रणे दशाननः ॥ ८ ॥

ततः समासाद्य रणे दशाननं
समन्त्रि वर्गं सबल प्रयायिनम् ।
हृदि स्थितं तस्य मतं बलं च वै
सुखेन मत्वा हमितः पुनर् व्रजे ॥ ९ ॥

इदमस्य नृशंसस्य नन्दनोपम मुत्तमम् ।
वनं नेत्र मनःकान्तं नाना द्रुम लतायुतम् ॥ १० ॥

इदं विध्वंसयिष्यामि शुष्कं वन मिवानलः ।
अस्मिन् भग्ने ततः कोपं करिष्यति दशाननः ॥ ११ ॥

ततो महत्साश्व महारथ द्विपं
बलं समादेक्ष्यति राक्षसाधिपः ।
त्रिशूल कालायस पट्टसायुधं
ततो महद् युद्धमिदं भविष्यति ॥ १२ ॥

अहं तु तैः सम्यति चण्डविक्रमैः
समेत्य रक्षोभि रसह्य विक्रमः ।
निहत्य तद्रावण चोदितं बलं
सुखं गमिष्यामि कपीश्वरालयम् ॥ १३ ॥

ततो मारुतवत् क्रुद्धो मारुतिर् भीमविक्रमः ।
ऊरुवेगेन महता द्रुमान् क्षेप्तु मथारभत् ॥ १४ ॥

ततस्तु हनुमान् वीरो बभञ्ज प्रमदावनम् ।
मत्त द्विज समाघुष्टं नाना द्रुम लतायुतम् ॥ १५ ॥

तद्वनं मथितैर् वृक्षै र्भिन्नैश्च सलिलाशयैः ।
चूर्णितैः पर्वताग्रैश्च बभूवाप्रिय दर्शनम् ॥ १६ ॥

नाना शकुन्त विरुतैः प्रभिन्नैः सलिलाशयैः ।
ताम्रैः किलसयैः क्लान्तैः क्लान्त द्रुम लतायुतम् ॥ १७ ॥

न बभौ तद्वनं तत्र दावानल हतं यथा ।
व्याकुला वरणा रेजुर् विह्वला इव ता लताः ॥ १८ ॥

लता गृहैश् चित्र गृहैश्च नाशितैः
महोरगैर् व्याल मृगैश्च निर्धुतैः ।
शिलागृहै रुन्मथितैस् तथा गृहैः
प्रनष्ट रूपं तदभून् महद्वनम् ॥ १९ ॥

सा विह्वलाऽशोक लता प्रताना
वनस्थली शोक लता प्रताना ।
जाता दशास्य प्रमदा वनस्य
कपेर् बलाद्धि प्रमदा वनस्य ॥ २० ॥

स तस्य कृत्वाऽर्थ पतेर् महाकपिः
महद् व्यलीकं मनसो महात्मनः ।
युयुत्सुरेको बहुभिर् महाबलैः
श्रिया ज्वलंस् तोरण मास्थितः कपिः ॥ २१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे एकचत्वारिंशः सर्गः ॥ ४१ ॥